कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।

लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि ॥ ३.२० ॥

karmaṇaiva hi saṁsiddhimāsthitā janakādayaḥ |
lokasaṅgrahamevāpi sampaśyankartumarhasi || 3.20||

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।

स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ ३.२१ ॥

yadyadācarati śreṣṭhastattadevetaro janaḥ |
sa yatpramāṇaṁ kurute lokastadanuvartate || 3.21||

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन ।

नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ ३.२२ ॥

na me pārthāsti kartavyaṁ triṣu lokeṣu kiñcana |
nānavāptamavāptavyaṁ varta eva ca karmaṇi || 3.22||

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।

मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ ३.२३ ॥

yadi hyahaṁ na varteyaṁ jātu karmaṇyatandritaḥ |
mama vartmānuvartante manuṣyāḥ pārtha sarvaśaḥ || 3.23||

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ।

सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥ ३.२४ ॥

utsīdeyurime lokā na kuryāṁ karma cedaham |
saṅkarasya ca kartā syāmupahanyāmimāḥ prajāḥ || 3.24||